फरवरी तः अप्रैल २०२४ पर्यन्तम्
माघ-कृष्ण-षष्ठी तः वैशाख-कृष्ण-षष्ठी पर्यन्तम्
(वै-२०८१)

RNI
DELSAN/2013/50379
ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-११ संयुक्ताङ्कः-७-९

सम्पादकः
डॉ. अरुणकुमार झा
सचिवः

एक साहित्यिक त्रैमासिक शोध पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन–2278–8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में आन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.- ०११-२०९२०३६३

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

फरवरी तः अप्रैल
२०२४ पर्यन्तम्

वर्षम्-११-संयुक्ताङ्कः- ७-९

(वै.-२०८१)

(माघ-कृष्ण-षष्ठी तः
वैशाख-कृष्ण-षष्ठी पर्यन्तम्)

सम्पादकः
डॉ. अरुणकुमारझा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

सम्पादक सहायकः
मनोजकुमारः

आवरण/सज्जा
पूजागड़ाकोटी


| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | विभाति मे भारतराष्ट्ररत्नम् | प्रो. चौडुरि उपेन्द्र रावः | १ |
| ३. | जयतु जयतु हे केशव! राघव! | डॉ. सर्वेशकुमारः मिश्रः | ४ |
| ४. | सरला सरला संस्कृत भाषा | ,, | ६ |
| ५. | जीवनम् | ,, | ९ |
| ६. | 'सुतरां शृणु मे' | डॉ. युवराजः भट्टराई | ११ |
| ७. | राष्ट्रपर्व-प्रसङ्गेषु राष्ट्रध्वजं वयं नुमः | प्रो. बनमाली विश्वालः | १३ |
| ८. | वन्दे प्रियं भारतम् | ,, | १६ |
| ९. | रमन्ते योगिनो यस्मिन् तस्मै रामाय धीमहि | ,, | १८ |
| १०. | वाग्वादिनीस्तवः | डॉ. हर्षदेवमाधवः | १९ |
| ११. | रमणमहर्षिः | ,, | २० |
| १२. | रामकृष्णपरमहंसस्तुतिः | ,, | २१ |
| १३. | दिव्या भारतमाता | श्री हेमचन्द्र बेलवालः 'हिमांशुः' | २२ |
| १४. | परिज्ञानम् (नाटकम्) | डॉ. कीर्तिवल्लभः शक्टा 'शाकाटायनः' | २३ |
| १५. | नूतनशिक्षकः | श्री हेमचन्द्र बेलवालः 'हिमांशुः' | २७ |
| १६. | काव्यलक्षणम् | डॉ. रमनदीप कौर | २९ |
| १७. | रसः | डॉ. अजीत सिंहः | ३२ |


दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(Govt. of N.C.T. , Delhi)

ई-पत्रिका

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 23637798

## सदस्यताशुल्कम्

प्रति-अङ्कम् : 25 रूप्यकाणि

वार्षिकम् : 250 रूप्यकाणि

ISSN : 2347-1565


©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi


शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), अन्तर्जाल माध्यमेन अथवा सी०टी०सी० चैक माध्यमेन (दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)


E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरभारतीसमुपका: सुहृदया:!**

**यथा चित्तं तथा वाच:, यथा वाचस्तथा क्रिया:।**
**चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥**

सज्जना: तानि एव वचांसि प्रयोक्तुं शक्नुवन्ति, यत् तेषां मनसि भवति। तथा एव संस्कृतकवयोपि स्वे मनसि सन्निहितान् सद्भावान् काव्यरूपेण निरूपयन्ति। कवीनां देशप्रेमसमन्वितस्वप्नानाम् अयं पत्रिकाया: विशेषाङ्क: प्रकाशित:। रचनाकारै: भारतभूवो वसुन्धराया अलौकिकवर्णनं शब्दपुष्पै: कृतं, यथा च वीरसैनिकानां देशसेवायां तत्परता च दर्शिता। भारतस्य मृत्तिका चन्दनमिव पूजिता। एतेषां काव्यानाम् अध्ययनं पाठकानां मनसि निश्चितं देशप्रेमभावनां जागरयेत्। अत एव एष: काव्यविशेष पत्रिकाङ्क: प्रकाशित:। इति शम्।।

**शकाब्द: -१९४६**

**भावत्क:**
**डॉ. अरुणकुमारझा**
**सचिव:**

# विभाति मे भारतराष्ट्ररत्नम्

-प्रो. चौडुरि उपेन्द्ररावः

त्यागेन धैर्येण पराक्रमेण
दानेन चालङ्कृतजीवनेन।
वीरैरनन्तैर्विजितारिवृन्दै-
र्विभाति मे भारतराष्ट्ररत्नम्।।१।।

नदीभिरुतुङ्गतरङ्गदीप्तै
स्त्रिभिस्समुद्रैः परिवेष्टितेयम्।
हिमावृतैश्शृङ्गिभिरुत्तरस्यां
विभाति मे भारतभूर्विशाला।।२।।



विभिन्नवेशैर्बहदेशभूषै
रनन्तभाषैर्विविधैर्विभागैः।
वेदान्तसिद्धान्तविशुद्धमेतत्
सनातनं भारतराष्ट्रमेतत् ।।३।।

शास्त्रैरनेकैरतिसुप्रसिद्धैः
वेदैर्विशुद्धैरतिपूज्यमेतत्।
रामायणाद्यैरपि दिव्यकाव्यै
र्विभाति मे भारतराष्ट्रमेतत् ।।४।।

इदं हि राष्ट्रं धनधान्यवृध्या
सुशोभितं स्वच्छनगैर्नदीभिः।
तथापि म्लेच्छाधमदूषितं मे
सुराष्ट्रमेतत्सततं समृद्धम् ।। ५।।




राष्ट्रं समाक्रान्तमिदं विशालं
परान्नभुग्भिः पतितैर्दरिद्रैः ।
अजेयमप्युन्नतमव्यजस्रम्
अनैक्यतादोषवशात्प्रजानाम् ।।६।।

विशालमौन्नत्यमपि स्वराष्ट्रं
समुज्ज्वलं श्रेष्ठतमं धरित्र्याम्।
परस्परेर्ष्यावशवर्तिभिरनृपैः
कथं गतं दुर्बलतां सुराष्ट्रम् ।।७।।

समृद्धवृक्षैः फलपुष्पपूर्णैः
वनैर्धरा नन्दनवत्सुरम्या।
सदैव सस्याञ्चितभूमिभागै
र्विराजते भारतराष्ट्रमेतत् ॥८॥



राणाप्रतापादिस्वराष्ट्रभक्तैः
पुराऽपि ख्यातैर्वरविक्रमाद्यैः।
नृपैरियं भूरतिसुप्रसिद्धा
समस्तभूमण्डलरत्नभूता ॥९॥

तथापि कैश्चित्कलुषीकृतं त
न्नराधमैस्तस्करतुल्यभूपैः।
निरन्तरान्तःकलहैर्नृपाणा
मवाप दौर्बल्यमिदं सुराष्ट्रम् ॥१०॥

म्लेच्छैर्यदा भारतभूः प्रविष्टा
हता इमे दुर्बलिनस्समेऽपि।
स्वार्थान्धभूता परवीरभीताः
स्वदुर्गुणैरेव पराजितास्ते ॥११॥

प्रध्वंसमानेषु शिवालयेषु
प्रविश्यमानेषु सुरालयेषु।
म्लेच्छैर्मदान्धैरतिनीचवृत्तैः
प्रसेहिरे भरतमातृपुत्राः ॥१२॥



साधून्विमोक्तुं वनिताश्च त्रातुं
दुष्टानिमान्दण्डयितुं तदानीम्।
पुरातने पावनराष्ट्ररत्ने
बभूवुरन्ये पुरुषोत्तमा भुवि ॥१३॥

यमालयं प्रापयितुं विमूढान्
सुरालयान्त्रातुमिह प्रवृद्धाः ।
शिवाजिराजेव शिवावताराः
बभूवुरन्येऽपि सुशासका इह ॥१४॥

विमोक्तुकामैर्भुवमांग्लदास्यात्
प्राणा हुतास्तैर्वरवीरपुत्रैः ।
तेषां किलासन् सफलोद्यमा वरा
स्तेनैव स्वातन्त्र्ययुतोऽद्य लोकः ॥१५॥

काशीमयोध्यामपि प्राप्य म्लेच्छै:
कृताऽपवित्रा खलु पूर्वमैतै: ।
शिवस्य रामस्य च पूर्विशाला
तथापि मौनं समुपाश्रिता वयम् ।।१६।।

महानुभावेन जितारिणा विना
महात्मना मोहनचन्द्रनाम्ना।
सावर्करेणापि विनान्यवीरै: ।
स्वातन्त्र्यमेतत्कथमागतं स्यात् ।।१७।।



स्वातन्त्र्यवीरैरिह क्रान्तिकारै:
कृता: प्रयत्नास्सफला बभूवु:।
तैर्वीरपुत्रै: प्रशशाम स्तुत्यै:
स्वातन्त्र्यदेव्या: प्रबला क्षुधा सा ।।१८।।

परन्त्विदानीं वयमेत्य सौख्यं
क्षिप्ता कथं जाति विवादगर्ते?
धीरैस्समानीतमपि स्वराज्यं
नीचोच्छेभावैर्विकलीकृतं कै:? ।। १९।।

विलुप्यमानं मम राष्ट्रसौख्यं
प्रवर्धनार्थं पुनरेव नित्यम्।
शिवाजिवत् विक्रमवज्जगत्यां
कदा समायास्यति राष्ट्रभक्त:? ।।२०।।

**-आचार्य:,**
**जवाहरलालनेहरुविश्वविद्यालय:**
**नवदेहली-११००६७**

# जयतु जयतु हे राघव!

-डॉ. सर्वेशकुमारः मिश्रः

जयतु जयतु हे केशव! राघव!
हे जयतु जयतु श्रीराम!।
जयतु जयतु हे हनुमन्नायक!
हे जयतु जयतु श्रीधाम।। १!!



जयतु जयतु दशग्रीवविनाशक !
हे जयतु जयतु श्रीराम!
जयतु जयतु हे शबरीतोषक!
मम हृदये वस श्रीराम! ।।२।।

जयतु जयतु हे संकटमोचक!
सदा जयतु हे सीताराम!
जयतु जयतु लंकेशविदारक!
रघुकुलतारक! हे मणिधारक! ।।३।।

जयतु जयतु हे दशरथनंदन !
हे जयतु जयतु वसुधाम !
आगछत्विह धामनि राघव
जयतु जयतु जगदीश्वर! माधव! ।।४।।



जयतु जयतु हे सीतावल्लभ !
हे वसतु भारते दर्शनदुर्लभ! ।
भजाम्यहं जय जय श्रीराम
जयतु जयतु हे राजन्! राम! ।।५।।

जयतु सदा सरयूजलमज्जक !
हे सज्जनपोषक! दुर्जनतर्जक !।
हे रामलला! हे सर्जक! पालक !
जयतु जयतु भवसागरतारक! ।।६।।

जय श्रीराम जय श्री राम
अवधपते! जय जय श्रीराम!।
जयतु जयतु जय सीताराम !
कण कण-राम! जय श्री राम ।। ७।।

जय रोमे रोमे वासिन् राम!
खलमल नाशक! जय श्री राम!।
कण कणवासिन् जय श्री राम!
हे नयनाभिराम! जय सीताराम! ।।८।।



# सरला सरला संस्कृत भाषा

-डॉ. सर्वेशकुमार मिश्रः

'मृदुला मृदुला'
'संस्कृतभाषा।'
'सरला सरला'
'संस्कृतभाषा ।।१।।'



'जन-जन-हृदये'
'व्याप्ता भाषा।'
'लोकसमूहे एषा भाषा'
'संस्कृतभाषा संस्कृतभाषा।।२।।'

'एषा भाषा'
'दैविकभाषा।'
'पंडितभाषा'
'संस्कृतभाषा।।३।।'



'मण्डितभाषा'
'पण्डित्यभाषा।'
'संस्कृतभाषा'
'वैदिकभाषा।।४।।'

'नैव कठिना'
'संस्कृतभाषा।'
'सरला सरला'
'संस्कृतभाषा।।५।।'

'केशव! माधव!'
'ईहू! पीहू! ।'
'एहि सदा वद'
'संस्कृतभाषाम्।।६।।'

‘एहि एहि त्वं’
‘रागी! माही!’
‘वद वद भाषाम्’
‘संस्कृतभाषाम्।।७।।’

‘वद वद नित्यं’
‘संस्कृतभाषाम्।’
‘सरलां भाषाम्’
‘संस्कृतभाषाम्।।८।।’

‘निजनाम कथय’
‘प्रभुनाम कथय।’
‘कथय कथय’
‘निजधाम कथय।।९।।’



‘यदपि कथय’
‘बत कथय कथय।’
‘संस्कृतभाषाम्’
‘सरलेन कथय।।१०।।’

‘सरला तरला’
‘संस्कृतभाषा।’
‘अमला विमला’
‘संस्कृतभाषा।।११।।’

‘हृदयगुहायाम्’
‘एषा भाषा।’
‘जयतु जयतु जय’
‘संस्कृतभाषा।।१२।।’

‘संस्कृतभाषा’
‘संस्कृतभाषा।’
‘ज्ञानीभाषा’
‘मानीभाषा।।१३।।’

'मानसकुंडे'
'संस्कृतभाषा।'
'जयतु जयतु जय'
'संस्कृतभाषा।।१४।।'

# 'जीवनम्'

'भोजनं वा रसं'
'जलपानादिकं।'
'ईंधनं मे शरीरे'
'शकट्यादिकं ।।१।।'

'जीवनं मे सदा'
'इव यात्रादिकं।'
'सुखदुःखं सदा'
'पुष्पकंटादिकं।।२।।'



'जीवने ये जना'
'सर्वयात्रार्थिना।'
'वायान्ति सदा'
'यांति वा ते जना ।।३।।'

'जीवनं नाचलं'
'क्षणभंगादिकम् ।'
'लोभलिप्सादिकं च'
'ह्यनन्तादिकम् ।।४।।'

'जीवनं जीवनं'
'काम्यते सर्वदा।'
'चंचलं चंचलं'
'मे मनस्तु सदा।।५।।'

'नर्मदा सर्वदा'
'अत्र वहतीह या'
'जीवनं जीवनं'
'कुर्वतीह सदा ।।६।।'

'शिवसंगे सदा ह्युच्यते सर्वदा'
'हर! हर! हर! हर सदा !'
'धर! धर! धर! धर सदा !'
'शब्दायते सा सदा नर्मदा ।।७।।'

'तद्धनं नो धनं '
'जीवनं मे धनम्।'
'जीवनं ही विना'
'सर्वम् निधनम्।।८।।'



'निर्धनं जीवनं'
'निर्धनं नो सदा।'
'निधनं जीवनं'
'जीवनं नो कदा ।।९।।'

'जीवनं जीवनं'
'सर्वदा जीवनम्।'
'निर्धनं जीवनं'
'सधनं जीवनम्।।१०।।'

**- जमुनीपुरम्, प्रयागराजः,**
**( महासचिवः वैश्विकसंस्कृतमंच )**
**उत्तरप्रदेशः**

# 'सुतरां शृणु मे'

- डॉ. युवराजः भट्टराई

भवनैः भरितं शकटैः खचितम्,
सततं हि चकास्ति च दीपमयम्।
त्वयि भाति सखे! यदिदं नगरम्,
शृणु तत्र किमस्ति नु दूषणकम्।।१।।

पठिताः लिखिताः सुजनाः नगरे,
विलसन्ति सुशिक्षितलोकगणे।
यदि तन्मननं हृदयेऽस्ति सखे!
भ्रमितोऽसि तदा सुतरां शृणु मे ।।२।।



बहुभोगविलासमये नगरे,
गगनोत्थगृहे सुविधानिचये।
न्युषितुं तव चापि मनः कुरुते,
युवराजकथां खलु कः शृणुते? ।।३।।

प्रभुभक्तिसमर्चनतारहिते,
सहयोगधियापि तथा विमुखे।
मदिरामदमत्तकुनृत्यमये,
नव जीवनमिच्छसि किं सुसखे! ।।४।।

मदमारहताः युवतीयुवकाः,
बहु कृत्रिमवेशयुताः सुमुखाः।
चलदृश्यविलोकनतो मुदिताः,
किमु सन्ति च ते मनसा सुखिताः?।।५।।

वदने मधुराः विलसन्ति गिरः,
हृदयेऽस्ति घृणा बहुधा भरिता।
परिधानसुशोभितशिष्टकला,
व्यवहारमतिश्च सदा कुटिला ।।६।।

शृणु पौरनृणां हृदयाणि भृशम्,
निगदामि भवन्ति सखेऽत्र कथम्।
लघुकानि विकारकराण्यनिशम्,
कठिनानि दयारहितानि पुनः॥७॥




धनसम्पदमेव समाश्रयणम्,
मनसेप्सितमस्ति च कृष्णधनम्।
निज सौधविवर्धनमेव मतम्,
सकलं नगरं विषये निरतम् ॥८॥

धनदुर्मदमत्तजनाः नगरे,
विलसन्तितमां सुसभासु समे।
सुजनाः कवयः सुधियश्च सखे!
प्रभवन्तु कथं प्रतिभाप्रसरे? ॥९॥

धनिनां चरणेषु नता प्रतिभा,
सुखसाधनलाभकृते निहता।
सुमतिः नगरेऽस्त्युपचारगता,
नगरे विफलन्ति सुकर्मपराः॥१०॥

-अध्यापकः (संस्कृत)
बालभारतीपब्लिकविद्यालयः
गंगाराम मार्गः, करोलबागः
नव देहली

# राष्ट्रपर्व-प्रसङ्गेषु राष्ट्रध्वजं वयं नुमः


-प्रो. बनमाली विश्वालः

राष्ट्रपर्वाणि राष्ट्रे नः पवित्राणि च सर्वथा।
राष्ट्रपर्व-प्रसङ्गेषु राष्ट्रध्वजं वयं नुमः ॥१॥
राष्ट्रध्वजोऽस्ति सम्मानस्सर्वेषां राष्ट्रवासिनाम्।
मानोऽपि स्वाभिमानोऽपि राष्ट्रध्वजो न संशयः ॥२॥

रक्षा राष्ट्रध्वजस्यापि कर्तव्या च विशेषतः।
अतो राष्ट्रविरोधिभ्यो रक्षणीयो ध्वजस्सदा ॥३॥
प्रणम्योऽस्ति ध्वजो वन्द्यः पूजनीयोऽपि सर्वथा।
कायेन मनसा वाचा राष्ट्रध्वजं वयं नुमः ॥४॥



पताका भारतीया च सर्ववन्द्याऽस्ति भारते।
गणतन्त्रदिनेऽस्माभिः क्रियते ध्वजवन्दनम्॥ ५॥
राष्ट्रध्वजस्त्रैवर्णोऽस्ति रहस्यमप्यनेकधा।
ध्वजप्रयुक्तवर्णाश्च प्रगतेः प्रतीकानि वै ॥६॥
तत्र केशरवर्णश्च समृद्धेः प्रतीकं मतम्।
श्वेतवर्णश्च शान्तेस्तु हरितं प्रगतेः पुनः ॥ ७॥
प्रायो विविध-संस्थासु राष्ट्रपर्वप्रसंगतः।
सांस्थानिकैश्च सोल्लासं राष्ट्रध्वजः प्रयुज्यते ॥८॥
दिने स्वतन्त्रतायाश्च, गणतन्त्रदिने पुनः।
राष्ट्रध्वज-प्रयोगस्य प्रथा सार्वत्रिकी मता ॥९॥
न्यायालयेषु राष्ट्रस्य नित्यमुड्डीयते ध्वजः।
सदा लोकसभायाश्च भवनेऽपि विशेषतः ॥१०॥
एवं विविधराज्यानां विधानभवनानि च।
प्रतिदिनञ्च तत्रापि राष्ट्रध्वजः प्रयुज्यते ॥११॥
रेलस्थानेषु चाद्यत्वे नित्यं ध्वजः प्रयुज्यते।
एवं हि व्योमयानेषु जलयानेषु कुत्रचित् ॥१२॥



सन्तिवान्ये ध्वजा नैके प्रयुज्यन्तेऽत्र भारते
मन्दिरेष्वाश्रमेष्वेव यानेषु विविधेषु वै ॥१३॥
शोभायात्रासु युद्धेषु ध्वजाः नानाविधाः पुनः।
एवं विजययात्रायां प्रयुज्यते ध्वजो महान् ॥१४॥


सर्वदा देवकार्येषु देव-ध्वजः प्रयुज्यते
पवित्रेषु प्रसङ्गेषु तन्महत्त्वं प्रशस्यते ॥१५॥
ध्वजानाञ्च प्रयोगे तु निर्देशाः विविधाः क्वचित्।
सामान्यानां ध्वजानाञ्च तथा राष्ट्रध्वजस्य वै ॥१६॥



संकेतश्चाशुभस्यापि कृष्ण-ध्वजेन सूच्यते
मृत्युदण्ड-विधाने तु कृष्ण-ध्वजः प्रयुज्यते ॥१७॥
रक्तध्वजो विपत्स्वेव सर्वासु च प्रयुज्यते
प्रयोगो रेलयानानामवरोद्धुं विशेषतः ॥१८॥

सर्वेषां शुभकार्याणां प्रारम्भे हरितध्वजः।
ध्वजेन हरितेनापि सूच्यते प्रगतिः क्वचित् ॥१९॥
स्वतन्त्रता-प्रतीकं च राष्ट्रध्वजो न संशयः।
यत्र यत्र ध्वजस्तत्र स्वातन्त्र्यं नियमोऽपि न ॥२०॥

नूनं स्थलविशेषेषु ध्वजा भिन्ना भवन्ति वै।
एवं हि दृश्यते भिन्नं ध्वजानां च प्रयोजनम् ॥२१॥
ध्वजोऽस्तु यश्च कश्चापि महत्त्वं तस्य वर्तते।
धर्मध्वजाः भवन्त्यत्र निष्पक्षाश्च सदा पुनः ॥२२॥



मुदा धर्मध्वजं वन्दे राष्ट्रध्वजं नमाम्यहम्।
वन्दे सर्वान् ध्वजांश्चाहं नत्वा ध्वजपरम्पराम् ॥२३॥
वन्दामहे वयं राष्ट्रं वन्दामहे स्वतन्त्रताम्।
नत्वा स्वातन्त्र्यवीरांश्च राष्ट्रध्वजे वयं नुमः ॥२४॥

# वन्दे प्रियं भारतम्

याता नः पितरो विधाय महतीः सेवाः स्वराष्ट्रस्य वै।
प्राणांस्तैस्तृणवद् विचिन्त्य महतो राष्ट्रस्य रक्षा कृता।
तन्मार्गे चलितुं यते परमहं योग्यो न तेषामिव
सन्मार्गे सततं स्वकीयचरितं नेतुं कथञ्चिद् यते ।।१।।



सा विद्या खलु या विमुक्तिपथगा ज्ञानञ्च यन्मोक्षदम्
एवं शिक्षयितुं किमस्ति जगतः शक्तिर्विना भारतम्?
योगं भोगपरं वदन्ति सकले विश्वे यदा भौतिकाः
मोक्ष-प्रापक-साधनञ्च मनुते लोकस्तदा भारते ।।२।।

राष्ट्रस्यास्य किमस्ति शक्तिरतुला ज्ञातुं यतन्ते जनाः
विश्वेऽद्यापि रहस्यमस्ति किमिदं तथ्यं न मानास्पदम्?
ज्ञातव्यं न मयैव किन्तु निखिले विश्वे समैर्बान्धवैः
संक्षिप्यात्र च भारतीय-चरितं संख्यातुमीहे क्वचित्।।३।।

यत्राम्भोधिजलं स्वराष्ट्र-महिमाख्याने तरङ्गायितम्
देवांस्तोषयितुं समर्चनविधौ चित्तञ्च लालायितम्।
क्षेत्रं यत्र सदा जनानदयितुं धान्यैः सुवर्णायितम्।
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।४।।



गङ्गा यत्र मता त्रिलोकसरिता मातेव त्रातुं जनान्
नद्यः क्षालयितुं वहन्ति सततं देवाङ्घ्रियुगान् पुनः।
देवा यत्र सदा प्रदाय मुदिता भक्तेभ्यः शुद्धाशिषः।
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।५।।

वृक्षा यत्र सदा प्रदाय जगते धन्याश्च नानौषधीः
गावो यत्र पयः प्रदाय सरसं सञ्जीवनीसंनिभम्।
खगा यत्र समस्वरेण च कुजन्त्यैक्यं हि गीतं नवम्
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।६।।

एकत्रैव चरन्ति यत्र पशवोरण्येऽभये निर्भया:
त्यक्त्वा द्वेषयुतं समस्तचरितं वन्याश्च ते जन्तव:।
मन्ये ते खलु शिक्षयन्ति जगतं धर्ममहिंसापरम्
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।७।।



नद्यो यत्र सदा वहन्ति परित: क्षेत्राण्यरण्यानि वै
भान्ति यत्र नगास्तपोबलनिभा: धैर्यप्रतीकाश्च ते।
राजन्तेऽपि हिमालयञ्च परित: मालेव यत्राद्रय:
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।८।।

सिन्धुर्वैतरणी शुतद्रि–यमुने कावेरी गोदावरी
शोणेनालकानन्दया तमसया मन्दाकिनी नर्मदा।
चेत्येता: प्रवहन्ति यत्र सरित्त: कृष्णाऽथ भागीरथी
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।९।।

वातैर्यत्र सुगन्धितै: ससलिलै: शीतैश्च पूतैर्नवै:
सिप्रा शीतयितुं सदा प्रयतते तापं महाकालजम्।
सर्वाङ्गे गरलं गलेऽपि न नीलं कालञ्च हालाहलं
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।१०।।

लीलां मानवजन्मनो हि चरितुं देवाश्च लालायिता:।
संहारञ्च विधातुमत्र दनुजा हुङ्काररावै: स्थिता:।
गन्धर्वास्स्वकलाप्रसारणधियो यत्रापि वद्धावरा:
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।११।।



पुत्रो यत्र च मातृपितृपदयो: सेवासु लालायित:
पुत्री यत्र कुलद्वयस्य च हितं प्रीत्या वृणाति स्यम्।
सन्तत्यै पितरौ च यत्र कुरुते त्यागानपूर्वांश्च कान्
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।१२।।

क्षेत्रं यत्र च सङ्गमोऽपि सरितां प्रायोऽस्ति तीर्थायितं
पाषाणेषु च यत्र देववसतिं सङ्कल्प्य पूजाऽर्पिता।।
वृक्षा: कल्पवटा: प्रदाय सकलं वाञ्छागतं प्रार्थितम्।
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।१३।।

धेनु: कामदुघा प्रपूर्य महतीं वाञ्छाञ्च सम्प्रार्थिताम्
पत्न्या यत्र गृहं सदा विजयतेऽरण्यं पुनस्तां विना।
दु:खं यत्र निगद्यते च नरकं सुखञ्च स्वर्गो मत:।
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।१४।।



भक्तो यत्र निलाद्रिनाथपदयो: पूर्ण: प्रपत्त्याश्रित:
देवो यत्र च विश्वनाथसदृशै: संज्ञाशतैर्भूषित:।
केदारेश्वर-बद्रिनाथ-चरणौ यत्रार्च्यते भक्तिदौ
वन्दे तं जगतां हिते प्रमुदितं वन्दे प्रियं भारतम् ।।१५।।



# रमन्ते योगिनो यस्मिन् तस्मै रामाय धीमहि

सत्यस्य महिमानं यः प्रोक्तवान् मर्त्यवासिनः।
श्रीरामाय नमस्तस्मै पुण्यश्लोकाय धीमते॥

वन्देऽहं रघुनाथञ्च रघुकुल-शिरोमणिम्।
दशरथात्मजं देवं सदा वन्द्यञ्च योगिभिः॥



कौशल्या-नन्दनं वन्दे वन्दे तं लक्ष्मणाग्रजम्।
वन्देऽहं रामभद्रञ्च रामचन्द्रं नरोत्तमम्॥

वन्दे सीतापतिं देवं वन्दे प्रजानुरञ्जनम्।
कैकेयी-स्नेहपात्रन्तं भरतेनाभिवन्दितम्॥

सुमित्रायाश्च वात्सल्यं येन प्राप्तमनायासम्।
शत्रुघ्नस्य तमादर्शं वन्दे चेक्ष्वाकुवंशजम्॥

हनुमता सदा पूज्यं शत्रुषड्यन्त्रनाशकम्।
मुनीनामाशिषा युक्तं वन्दे तं पुरुषोत्तमम्॥

रम-धातोश्च निष्पन्नो रामशब्दोऽस्ति सार्थकः।
रमन्ते योगिनो यस्मिन् तस्मै रामाय धीमहि॥

महावीराय रामाय नमोऽस्तु दीनबन्धवे।
पतितपावनं वन्दे दीन-हीन-सहायकम्॥

रामो रघुपतिर्वन्द्यो रामं वन्दामहे वयम्।
रामेण रक्षितो लोकः रामाय च नमोऽस्तु नः॥

त्राता नास्त्यत्र रामाच्च वयं रामस्य पूजकाः ।
आत्मलयो भवेद्रामे हे राम त्राहि नस्सदा॥

- केन्द्रीय संस्कृत विश्वविद्यालयः
५ पंखा रोड़य जनकपुरी,

# वाग्वादिनीस्तवः

-डॉ. हर्षदेवमाधवः



'ऐं' कारी सृष्टिरूपा त्वं क्लीं कारी कामरूपिणी ।
'सौ:' सौभाग्यप्रदेदेवि चिन्मयी त्वं शुचिस्मिते ।।

संविन्मयी महाशक्तिः सर्वैश्वर्यप्रदायिनी।
'वां वीं वूं' वागधिष्ठात्री, भारती भास्वरे! सदा ।

वाङ्मायाजालयुक्ता त्वं, पाशाङ्कुशधरा शुभे ।
मुनीनां मानसे हंसी 'हंस:' शब्द स्वरूपिणी ।।

ब्रां ब्रीं ब्रूं ब्रह्मणः शक्तिर्ब्राह्मी वाणी सरस्वती ।
मूलाधारे शयाना त्वं परा विश्वविमोहिनी ।।
हृदये मध्यमा भूत्वा स्फुरन्ती हृदयेश्वरी ।।


ब्रह्मरन्ध्रे सुधासारा शिवा त्वं शङ्करी मता ।
रक्तशुक्लपदाम्भोजे! नौका त्वं भवसागरे ।।

'भ्रां भ्रीं भ्रूं' सर्वभाषासु व्यवहारप्रवर्तिका ।
शां शीं शुं शुद्धरूपाऽसि गैर्वाणी जननी परा ।।

# रमणमहर्षिः

शान्तः प्रसन्नः परमात्मबुद्धिः
सदात्मरूपो विमलात्मशुद्धः ।
दयानिधिस्स्वात्मनि नित्यमुक्तो
गुरुर्महात्मा रमणो महर्षिः ॥

द्वन्द्वैर्विमुक्तश्च विकारहीनो
भावैकगम्यः करुणाब्धिकल्पः ।
समाधिलीनः सुखदुःखहीनो
विचक्षणोऽसौ रमणो महर्षिः ॥



शिवात्मभावेन समन्वितो यः
शिवस्स्वरूपः शिवमार्गद्रष्टा ।
ज्ञानाद्रितुल्यो ह्यरुणाचलेन्द्रो
गुरुर्गरीयान् रमणो महर्षिः ॥

शैलारुणे ज्ञानसहस्ररश्मि-
र्योगी यतात्मा नियतेन्द्रियोऽसौ ।
संसारनौका तिमिरेषु दीपो
रत्नाकरः श्रीरमणो महर्षिः ॥

शोकैर्विमुक्तो मनसा विरक्तः
प्रफुल्लनेत्रो मृदुहास्यवक्त्रः ।
"आत्मप्रदीपो भव" इत्युवाच
ज्ञातात्मतत्त्वो रमणो महर्षिः ॥

# रामकृष्णपरमहंसस्तुतिः

निरञ्जनाय नित्याय श्रेष्ठाय गुरुमूर्तये ।
नमः परमहंसाय रामकृष्णस्वरूपिणे ।
स्वात्मानन्दलवीभूतब्रह्मानन्दाय भास्वते ।
सदा समाधिमग्नाय रामकृष्णाय ते नमः ।।

शिष्येण परमोत्कर्षः प्राप्तो येन च योगिने ।
नमस्तुभ्यं नमस्तुभ्यं रामकृष्णमहर्षये ।
संसारसागरे नौका, मृत्युकाले च तारकः ।
स एव रामकृष्णोऽस्ति गुरुमूर्तिर्हृदि स्थितः ।।

कालीभक्ताय शान्ताय स्वस्थाय पथदर्शिने ।
रामकृष्णस्वरूपाय प्रणामा गुरुमूर्तये ।।



-८, राजतिलक बंगलो,
आबादनगरम्, बसस्थानकस्य पार्श्वे
बोपल, अहमदाबादम्-३८००५८

# दिव्या भारतमाता
(विशेषण -विशेष्यबोधः )

-हेमचन्द्र बेलवालः

माता गंगा सदा पवित्रा
सुपूजनीया गोमाता ।
अतीव रम्या पुष्पवाटिका
दिव्या भारतमाता ।।

कृष्णः काकः शीघ्रं उडयते
लघुः शशः मन्दं याति ।
रिक्तः घनः सदैव न वर्षति
पूर्णः घनः प्रवर्षति।।

पिपीलिकः अल्पं खादति
बहु खादति गजराजः ।
भीतः हरिणः मौनं तिष्ठति
भ्रमति बली वनराजः ।।

रक्तवर्णकं बुरांशपुष्पम्
भवति कोमलं कमलम् ।
सुदर्शनीयं मनोमोहकं
सकलं भारतवर्षम् ।।



-रा. उ. मा. विद्यालयः गोदी,
चौखुटिया, अल्मोड़ा,
उत्तराखण्डः प्रदेशः-२६३६५६

# परिज्ञानम्

-डॉ. कीर्तिवल्लभः शक्टा 'शाकटायनः'

**काश्यां यो वसते सदा प्रमुदितः भक्तैः समाराधितः**
**वामाङ्गे गिरिजा शुभा भगवती राराजते नित्यशः ।**
**सन्तुष्टोऽत्र सुभैरवः खलु सदा संसेवते तत्पदं**
**वन्दे तं परमेश्वरं गुणनिधिं श्रीविश्वनाथं-हरम् ॥१॥**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

**नटी-** अहो अति प्रसन्नो प्रतीयसे त्वमद्य खलु किमत्र कारणम्?

**सूत्रधारः-** प्रिये! चिन्तयामि विश्वे नैकाभाषा विद्यन्ते परं भारते तु गीर्वाणवाण्येव पठनं पाठनं सम्पादनं च मह्यं रोचते।

**भारते भारती भाति मधुरा संस्कृतान्विता ।**
**जनैः सेव्या सदादिव्या मंगलाधर्मर्धिनी ॥२॥**

**नटी-** अहमप्येवमनुभवामि।

**सूत्रधारः -** तर्हि पात्रान्सुसज्जय वयमद्य कीर्तिवल्लभ शाकटायन विरचितं परिज्ञानमिति नाटकस्य अभिनयकर्तुं समुत्सुकाः। पश्य शरदर्तुरिदानीं स्वकौशलेन सर्वान्मोहयतीति मन्ये- यतो हि-



**धरा समग्रा रुचिरास्ति नित्यं**
**काले प्रभाते शरदागमेऽस्मिन् ।**
**न तापभीतिः न च शीततापः**
**जलेषु नैर्मल्य विभा नवीना ॥३॥**
**कान्ता प्रसन्ना रमणी प्रसन्ना**
**धरा प्रसन्नाः वयः प्रसन्नाः।**
**नद्यः प्रसन्नाः गिरयः प्रसन्नाः**
**विलोक्य सर्वं गिरिजा प्रसन्ना ॥४॥**

**नटी-** आम् नूनमेव अस्मिन् ऋतौ गिरिजा सदैव प्रसन्ना भवति यतो हि शारदीयेऽस्मिन् नवरात्रि पर्वणि गेहे गेहे प्रति मन्दिरे तस्याः पूजनं भवति।

**नटी-** पश्यतावत् अस्मिन्नवरात्रावसरे गृहे गृहे प्रतिमन्दिरे च देवी सर्वत्रैव राजते-

**दुर्गा या वरदायिनी भगवती सम्पूजिता मानवैः**
**भक्त्या या विदधाति वाञ्छितफलं सैषा महा दुर्गमा।**

**कल्याणं कुरुतेऽत्र नित्यविहरन्भूम्यां मनोहारिणी**
**सौम्या सा शरदागमे फलवती भूयात्सदा शाङ्करी ॥५॥**

**नट–** आम् देवि! अद्यवयं कूर्मांचलेषु गुरु गोरक्षनाथत: नाति दूरे मोष्टाबकोड़ा इति ग्रामे गच्छाम:।

**नटी–** तत: प्रारम्भिको भवति परिज्ञानं नाम नाटकोऽयम्।

(तत: प्रविशति अशीति वर्षीयो प्रह्लाद सिंह:)

**प्रह्लाद:–** भो कुत्रासि! किं करोषि? शीघ्रं कुरु आवां सूर्य–मन्दिरं गत्वा सूर्यम् आराध्य झटिति प्रतिवर्तयिष्याव:।

**देवकी–** त्वरया अलम्। भणामि इदानीं महा वृद्धत्वं गच्छन्ति भवन्त: तथापि भवतां शीघ्रता न गता।

**प्रह्लाद:–** नैव बहूनि कार्यादीनि सनत्यत्र। श्व: प्रतापो स्व सेवायां गमिष्यति। निशामुखे सत्यनारायणस्य कथा भविता। प्रतापस्य मित्राणि तेन सह मेलनार्थमादिवसं गृहे समागमष्यन्ति। चिन्तयामि क्षणावकासोऽपि नास्त्यद्य अत: यथाहं कथयामि तथा कुरु।

**( मन्दिरं प्रविश्यं सूर्यं प्रणम्य )**



**प्रार्थयत:–**

**जगन्नियन्ता खलु सत्यमेव त्वमेव कर्तासि प्रकाशराशे:।**
**त्वमेव साक्षी हि युगान्तराणां अतस्त्वदीये चरणौ नमाम: ॥६॥**

**देवकी–** अवकाशं समाप्य मम प्रताप: श्व: स्वसेनायां गमिष्यति न जाने कथं कष्टमनुभवामि। न जाने किं कारणमस्ति ?

**प्रह्लाद:–** मास्तु चिन्ता! साम्प्रतं यावत्स: एकल: सन् गतवान्। श्व: निजेन परिवारेण सह..... अनेन तव हृदये अद्येव विरह: समायात्यनेन।

**देवकी–**

**स्वप्नस्तु सार्थको नासीत्वामचक्षुस्फरायते ।**
**चिन्तयन्मानसे त्वद्य हे विधे किं भविष्यति ॥ ७ ॥**

**प्रताप:–** इदं तव ममत्वं न खलु चिन्ता।

**चिन्ता दु:खविधायिनी हि सततं जानन्ति विज्ञंवरा:**
**नैवं सा सुखदा कदापि सरला पीडा नवा दायिनी।**
**सत्यं योग विनासिनी भययुता ग्राह्यान्न किंचित्त्वया**
**चित्ते स्वे सुविचार्य शुद्धमनसा चिन्ता विमुक्ता भव ॥ ८ ॥**

**देवकी-** जानामि तथापि..........।

**प्रह्लाद:-** अहमपि तवोदितां भावनां चिन्ताया: विषयमपि जानामि। इत्थम् आयातीदानीं हृदये तव त्रय: ममपुत्रा: परं वार्धक्यावसरे सेवाकर्तुं पार्श्वे न पुत्र: पुत्रवधू च।

**देवकी-** न सत्यमस्ति। पौत्रद्वयानां शिक्षणार्थं वध्वा तु गृहात्दूरं समुचित्स्थलेऽग्रिमे वर्षे गमनमानश्यकं तथापि।

**प्रह्लाद:-** सत्योदीरितं त्वया। यतो हि साम्प्रतं तु शैशवादेव बालकानां पठनं पाठनं भवति। दुर्भाग्येण आवयो: गृहं विकसितेऽपि समय एतादृशे ग्रामे अस्ति यत्र अद्यापि सारल्येनगमनागमनाय समुचितं पगमार्गं नास्ति बसादिकानां तु का कथा।

**देवकी-** तत्तु सत्यमेव।

**प्रह्लाद:** - जानासि कति काठिन्येन तदानीं बालकनामस्मद् शिक्षणं जातम्। इत: ५५ कि.मी. चम्पावतम् तत: १४ किलोमीटरं लोहाघाटम्। पगमार्गेण पादाभ्यां चलनम् तदानीं तु चम्पावत्यामपि केवलं हाई-स्कूलं यावत् शिक्षा व्यवस्था आसीत् उत्तर माध्यमिक शिक्षार्थं लोहाघाटं वा अल्मोड़ा पिथौरागढ़े गत्वा बालका: पठन्ति स्म।

**देवकी-** कतिपय वारं तु बालकानां कृते सम्बलं शिरसि नीत्वाऽहं पादाभ्यां चलन्ती तत्र चम्पावतीं प्रति गतवती।

**प्रह्लाद:-** देवि! भवत्या परिश्रमस्य प्रसादेन आवयो: बालका: सुशिक्षिता: सर्वकारस्य सेनायां रता: वर्तन्ते।

**देवकी-** देव! फलत्यस्माकं जीवने भवतां पुण्यकर्माणि।

**प्रह्लाद:-** देवि क्व गता: जीवनस्य यौवनपूर्णा: दिवसा:। स्मरामि सर्वदा तत् यौवनं कियत्कालं पूर्वं शैशवं भुक्ता यौवनं भुक्तं साम्प्रतं वृद्धावस्था समागता।

**क्व यान्ति सत्यं दिवसा हि लोके**
**आशैशवात्संस्मरणं करोमि।**
**जरा कदा ह्यागत चिन्त्यमान:**
**सीदामि नित्यं शृणु देवि सर्वम् ॥ ९ ॥**

**देवकी-** ईदृशोऽयं चराचरात्मकं जगत्।

**प्रह्लाद:-** अत: भणामि चिन्तामास्तु। प्रह्लाद: स्व परिवारस्य उन्नत्यै शिशूनां रक्षणार्थं शिक्षणार्थं च स: स्व परिवारं नयति अत: सर्वं शुभं भविष्यति।

**प्रह्लाद:-** सर्वथा सुयोग्य: संस्कार-सम्पन्न: अस्ति मम पुत्र:। अद्य आदिवसं तस्य मित्राणि मिलनार्थं समागमिष्यन्ति सायंकाले प्रतिवेसिन: सर्वे ग्रामवासिन: कथाश्रवण व्याजेन गृहे समवेता भविष्यन्ति सर्वेषां समादर: त्वया करणीय:।

**देवकी-** तत्परास्मि देव।

**प्रह्लाद:-** पश्य कति सभ्या: सौम्या मैत्रीभावयुता: सन्ति मम प्रतिवेसिन: ग्रामवासिनश्च य: कोऽपि ग्रामात् बहिर्गच्छति तस्य शुभकामानार्थं आगते सति स्वागतार्थं सदैव निष्ठया तत्परा: भवन्ति। सर्वत्र नास्ति एतादृशी स्थिति: अनेन मया अद्य सत्यनारायण कथाया: आयोजनं कारितम्।

## ( दृश्य परिवर्तनम् )



बकोडास्था सर्वे ग्रामीणाः सपदि सायंकाले प्रह्लादस्य गृहे समवेताः सन्ति। पूजा प्रसादान्ते सर्वे प्रह्लादेन सह वार्तारताः सन्ति। विशेषतः पूजां कृते सः प्रेरणादायकः सर्वदा तान् प्रेरयति।

**प्रमोदः**– भो भातृवर्यः अहमपि सैनिको भूत्वा राष्ट्रसेवां कर्तुम् अभिलषामि।

**प्रतापः**– वत्स! त्वत्समानाः ये बालकाः सन्ति सेनायां गन्तुमभिलषिन्ति तान् सर्वान्निाह्वयतु। सर्वैसह अहं वार्तां कर्तुमिच्छामि।

(शीघ्रं हि पञ्चबालकाः तत्समीपे समायान्ति।)

(तेषु सुरेशः पृच्छति–)

**सुरेशः**– भातृवर्य! सर्वां सरलां विधिं कथय तामेवधार्य प्रयतिष्यै ॥

**प्रताप**– सर्वे सावधानेन शृणन्तु। प्रथमं पठनेध्यानरताः भवन्तु। माध्यमिक कक्षायाः बहु महत्त्वं भवति। अधिकाधिकान् अङ्कान् गृहीत्वा सैनिक सेवार्थं प्रयत्नः विधेयः। शरीर रक्षायाः प्रयत्नः बहुपयोगी भवति।

**स्वस्थं शरीरं सफला च बुद्धिः**
**स्फूर्तिश्च मन्ये सुगतिं ददाति ।**
**व्यायाम क्रीडा प्रददाति सौख्यं**
**सुपाच्य भोज्यञ्च करोति सौख्यम् ॥१०॥**

अपि च–

**कुसंगतिश्चात्र करोति नाशं**
**जानन्तु सर्वे हितकारिवार्ताम्**
**अतः सुसंगः करणीयमस्ति**
**वाञ्छन्ति ये श्रेष्ठपदमलक्ष्यम् ॥११॥**

**हरीशः**– भातृवर्य! मया श्रुतं तत्र प्रशिक्षण काले बहु कष्टं भवति।

**तापः-** नैवं, सैनिकानां जीवनस्तु विविधानां कष्टानां समाधानाय भवति। तत्र ये असावधानाः भवन्ति वा सर्वदैव विश्रामरताः भवन्ति तेषां कृते प्रारम्भे किञ्चिदनुभूयते। एतदर्थं प्रेरयामि सर्वान् येषां विद्यालये एन.सी.सी. राष्ट्रिय कैडेट कोरः इति वर्तते तै एनं गृहीत्वा कुशली भवन्तु। मयापि अध्ययन-काले लोहाघाट-नगरे अस्य माध्यमेन कौशलं प्राप्तम् येन सर्वदा सेनायां मम सम्मानः अभवत् अद्यापि प्रतिदिनं व्यायामे ममाभिरुचिः तथैव क्रीडने च।



**-आदर्श संस्कृतग्रामः, खर्ककार्की**
**चम्पावतम्, उत्तराखण्डः**

# नूतनशिक्षकः

**–डॉ.हेमचन्द्रबेलवालः 'हिमांशुः'**

एकस्मिन् ग्रामे एकः विद्यालयः आसीत्। सः विद्यालयः सुन्दरः प्रसिद्धः च आसीत्। किन्तु तत्र संस्कृतशिक्षकः न आसीत्। एकदा तत्र एकः रामचन्द्रनामकः नवनियुक्तः संस्कृतशिक्षकः आगच्छति। पंचविंशतिवर्षदेशीयः रामचन्द्रः प्रथमवारम् एव विद्यालये पाठयति। सः उत्साहेन संस्कृतं पाठयति। तस्य छात्रः अपि उत्साहेन संस्कृतं पठन्ति। शिक्षकस्य आगमनात् पश्चात् अल्पे एव समये बहवः छात्राः संस्कृतपठनं जानन्ति। संस्कृतपठने छात्राणां रुचिः अपि वर्धते। ते प्रतिदिनं शिक्षकात् संस्कृतं पठन्ति। नवीनशब्दानां वाक्यानां च संस्कृतानुवादं पृच्छन्ति। शिक्षकः सरलं संस्कृतं वदति, अतः छात्राः सर्वमपि विषयम् अवगच्छन्ति। सर्वे छात्राः गृहकार्यं कक्षाकार्यं च पूर्णं कुर्वन्ति, सुलेखम् अपि लिखन्ति। सः छात्रेभ्यः न तु शारीरिकं दण्डं ददाति न च मानसिकं दण्डं ददाति।




कथयन्ति यत्– ''नवीनः शिक्षकः, पुरातनः चिकित्सकः'' इति। एतौ द्वौ अपि उत्साहपूर्णौ भवतः। अर्थात् नवीने शिक्षके, पुरातने चिकित्सके च महान् उत्साहः भवति। सत्यम् एव एतत् वचनम्। यतो हि संस्कृतशिक्षकः रामचन्द्रः कदापि रिक्तः न दृश्यते। सः रिक्तकालांशे अपि शिक्षणोपकरणानि पश्यति। संस्कृतविषयं पाठयितुं सरलोपायं विचारयति। एतेषु दिनेषु विद्यालये छात्रोपस्थितिः अपि अधिका भवति। अन्ये शिक्षकाः अपि छात्रोत्साहं पश्यन्ति। ते शिक्षकस्योत्साहम् अपि वर्धयन्ति। विद्यालये पूर्वतः एव शिक्षणोचितं वातावरणम् आसीत्। सर्वेषु शिक्षकेशु परस्परं महान् स्नेहः आसीत्। एकस्यापि अनुपस्थितौ सर्वे तस्यानुपस्थितिम् अनुभवन्ति। सुदूरात् आगताः शिक्षकाः स्वकीयं स्वकीयं विषयं परिश्रमेण पाठयन्ति। सर्वेऽपि स्व-स्वविषये निपुणाः भवन्ति। किन्तु संस्कृताध्यापकः तेषु सर्वेषु नवीनः आसीत् अतः तस्याध्यापने बहूत्साहः आसीत्।

शनैः शनैः कालः गच्छति। रामचन्द्रः शिक्षणानुभवं प्राप्तवान्। छात्रान् प्रति सः सदैव समर्पितः जागरूकः च दृश्यते। ग्रामीणाः तस्याध्यापनस्य बहु प्रशंसां कुर्वन्ति– ''स बहूत्तमं पाठयतीति''। सः यथा शिक्षणाय समर्पितः, तथैव ग्रामीणाः अपि तस्य सहयोगाय समर्पिताः भवन्ति। तस्य मधुरभाषणं जनानां सुखाय भवति। सः न केवलं विद्यालयस्य विकासाय अपितु ग्रामस्य विकासाय अपि प्रयत्नं करोति। तस्य प्रयत्नेन ग्रामे सर्वे अपि कथयन्ति यत्–संस्कृतं तु बहुरुचिरं भवतीति।

एकदा स्वतन्त्रतादिवसे सः यदा एकां देशभक्तिपूर्णां धट्टनाम् अवदत् तदा सर्वे शिक्षकाः छात्राः च भावुकाः जाताः। वस्तुतः, देशवीराणां योगदानविषये तु सर्वैः अपि श्रुतमेव, किन्तु सः रामचन्द्रः यां घट्टनां श्रावितवान् सा अभूतपूर्वा एवासीत्। देशोन्नतिः तस्य प्रमुखं लक्ष्यम् आसीत्। अतः सः सर्वदा तादृशं कार्यं करोति येन देशहितं भवति। सः लालबहादुरशास्त्रिमहोदयस्य जीवनं सदा स्मरति। तेषां जीवनं कियत् सरलमासीदिति सः वारम्वारं छात्रानपि वदति। सः कक्षायामपि देशवीराणां गुणगानं करोति, तेषां बलिदानविषये छात्रान् बोधयति।

छात्राः अपि सुभाषचन्द्रबोसः, भगतसिंहः, चन्द्रशेखर-आजादः इति एतेषां वीराणां जीवनकथां सावधानं शृण्वन्ति। ते यदापि समयो मिलति तदा देशवीराणां जीवनविषयककथां श्रोतुमुत्साहिनः भवन्ति। शिक्षकः अपि मध्ये मध्ये छात्रान् कथां श्रावयति। छात्राः पठने कदापि अनवधानतां न कुर्वन्ति। अन्यान् विषयान् अपि सम्यक् पठन्ति। गृहकार्यमपि समयेन कुर्वन्ति।

प्रायः पंचवर्षेषु विद्यालयस्य नाम सर्वत्र चर्चितं जातम्। छात्रा अधुनापि शिक्षकं रामचन्द्रमहोदयं "नूतनशिक्षकः" इति नाम्ना एव कथयन्ति। ग्रामस्य बालाः अपि किंचित् किंचित् संस्कृतं वदन्ति। शिक्षकः सस्वरं श्लोकमपि पाठयति। छात्राः ध्यानेन पाठं पठन्ति, स्मरन्ति, गायन्ति च। छात्राः गृहे, बहिः, आवागमनकाले, मार्गे सर्वदैव संस्कृतशब्दानां पाठानां च चर्चां कुर्वन्ति। शिक्षकः पाठं सरलं कर्तुं संस्कृतखेलमपि कारयति। सर्वे छात्राः धातुरूपाणि शब्दरूपाणि च खेलमाध्यमेन स्मरन्ति। ते उपसर्गानपि खेलमाध्यमेनैव खेलितुं पठितुं च प्रयत्नं कुर्वन्ति। एतानि दिनानि संस्कृताय ग्रामाय छात्रेभ्यः च बहूत्तमानि दिनानि आसन्।

एकस्मिन् दिने यदा छात्रैः ग्रामीणैः च श्रुतं यत्-संस्कृतशिक्षकस्य रामचन्द्रमहोदयस्य स्थानान्तरणम् अन्यत्र भवति तदा सर्वे अपि दुःखिताः जाताः। यद्यपि स्थानान्तरणेन शिक्षकस्य हितं भवति स्म, सः स्वगृहजनानां निकटे गच्छति स्म, किन्तु विद्यालयाय इयम् अशुभा सूचना आसीत्।

अस्मिन् दिने छात्राः हताशाः निराशाः च दृष्यन्ते। सर्वेऽपि परस्परं कथयन्ति यद्-अहो! कियत्प्रेम्णा पाठयति स्म अस्माकं संस्कृतशिक्षकः, सः तु कदापि तर्जनं न करोति स्म। सः प्रतियोगितासु नयति स्म, सामान्यज्ञानप्रश्नान् पृच्छति स्म, संस्कृतमाध्यमेन एव खेलयति स्म। सः तु संस्कृतश्लोकानपि लयेन गायति स्म। न जाने, अपरः संस्कृतशिक्षकः कः आगमिष्यति। यदि आगमिष्यति तर्हि न जाने कीदृशः भविष्यति इति।

रामचन्द्रमहोदयस्य सौप्रास्थानिकं जातम्। प्रत्येकजनस्य नेत्रद्वयम् अश्रुपूर्णम् आसीत्। सर्वे अपि तादृशस्य शिक्षकस्य सुखमयजीवनाय शुभाशयान् दत्तवन्तः। छात्राः सुन्दराणि उपहारफलकानि दत्त्वा तस्य शुभप्रयाणे सहयोगं कृतवन्तः।

अद्यापि सः शिक्षकः रामचन्द्रः यत्र कुत्रापि गच्छति सर्वत्र तस्य शिक्षणस्य छात्रस्नेहस्य च चर्चा भवति। वस्तुतः वन्दनीयः सः वास्तविकः गुरुः।

**-संस्कृताध्यापकः**
**रा.उ.मा.वि. घसाड,**
**पो. विनायक (मुवानी)**
**जिला पिथौरागढ, उ०ख०**

# काव्यलक्षणम्

-डॉ. रमनदीप कौर

किं स्वरूपं काव्यस्य इत्यत्र निस्संशयं विद्यन्ते विदुषां विप्रतिपत्तयः। तन्निरूपयन् आद्याचार्यो भामहः प्राह- **शब्दार्थौ सहितौ काव्यम्।**[1] अत्र लक्षणे भामहेन पूर्व-प्रथितस्य परम्पराद्वयस्य समाहारश्चातुर्येण अकारि। इह प्रकरणे तेन यदुक्तं तस्मात् स्फुटताम् उपैति यत् पूर्वगतेषु विपश्चित्सु केचित् अर्थशोभाजनकान् अर्थालंकारान् रूपकादीन् काव्यसौन्दर्यनिष्पादकान् मेनिरे अर्थप्रतीतेः अनन्तरमेव आनन्दानुभूतिः जायते इति। अपरे च शब्दसौन्दर्याधायकान् शब्दालंकारान् काव्यमिति जग्रहुः शब्दज्ञानानन्तरमेव अर्थाधिगतिर्भवति, अर्थावबोधं विनैव शब्दसौन्दर्यम् आस्वादयितुं च शक्यते इति। ऐकान्तिकेन शब्दं वा अर्थं वा काव्यं मन्यमाना बुधाः तत्र अवर्तन्त इति वक्रोक्तिजी वितकारस्य कुन्तकस्य प्रामाण्यादपि अवगम्यते। भणति सः-केषांचिन्मतं कविकौशलकल्पितकमनी-यातिशयः शब्द एव केवलं काव्यम् इति, केषांचिद् वाच्यमेव रचना **वैचित्र्यचमत्कारकारि काव्यम् इति।**[2] इमं मतद्वयी विकला अगुण्या चेति न परोक्षं विदाम्। वैकल्यमस्याः निराकुर्वन् भामहः शब्दार्थौ उभौ काव्यत्वेन अभ्युपागच्छत्, एकस्य अन्यस्मिन् अन्तर्भावः कर्तुम् अशक्यत्वात् -**'शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः"।**[3] न केवलं शब्द काव्ये रामणीयकम् आवहति, न केवलम् अर्थः। तयोः साहित्यमेव (सहभाव एव) काव्ये चमत्कारं किमपि आदधाति इति साधूक्तं तेन - शब्दार्थौ सहितौ काव्यम्।

अत्र प्रवर्तते कापि चिन्ता। किं सर्वौ (अविशिष्टौ) शब्दार्थौ काव्यं भवितुम् अर्हतः? अपि च, किं शब्दार्थौ असहितौ अपि भवतः - शब्दार्थयोः सहभावस्याभावः कदाचिद् वा भवतीति? अविशिष्टौ शब्दार्थौ चेत् काव्यत्वेन गृह्येते तर्हि निखिलस्य गुण्यस्य अगुण्यस्य वा वांगमयस्य काव्येऽन्तःपातः स्यात्। तच्च नेष्टं सूरीणाम्। शब्दार्थयोश्च नित्यसम्बन्धत्वात् तयोः कथंचिदपि साहित्यविरहः(सहभावाभावः)भवति। यदाह वक्रोक्तिजीवितकारः "ननु च वाच्यवाचकसम्बन्धस्य विद्यमानत्वाद् एतयोः न कथञ्चिदपि साहित्यविरहः सत्यमेतत्, किन्तु विशिष्टमेवेह साहित्यमभिप्रेतम्'। इह 'विशिष्टौ शब्दार्थौ काव्यम्' इति समुद्रबन्धेन अलंकारसर्वस्वटीकाकारेण भणितम् अव्यभिचारि तद् वचः। किं शब्दार्थयोः तद् वैशिष्ट्यम्? शब्दार्थयोः वा काव्यस्य वास्य वैशिष्ट्यस्य अन्वेषणमेव काव्यस्य सारभूतम्। वामनेन काव्यस्य वैशिष्ट्यं इत्थं प्रतिपादितम्-काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोः वर्तते।[4] काव्यमीमांसाकारेण राजशेखरेणऽपि प्रकारान्तरेण भणितम्-गुणवदलंकृतं च वाक्यमेव काव्यम्।[5]

पूर्वप्रथितां पञ्चदशशतकावगाहिनी काव्यशास्त्र-परम्परां सम्यक् मनसि निधाय मम्मटेन आचार्यप्रवरेण शब्दार्थयोः वैशिष्टयं स्वीये काव्यलक्षणे समायोजि। न अविशिष्टौ शब्दार्थौ काव्यम्। विशिष्टौ एव तौ काव्यपदम् आरोढुम् अलम्। "तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि" इति।[6] इदं हि तस्य अभिमतम्-रसापघातक-नित्यदोष-रहितौ माधुर्य-प्रसादादिगुणसहितौ शब्दार्थौ काव्यम्। तौ प्रायेण सर्वत्र सालंकारौ भवतः परं यदि क्वचित् तौ स्फुटालंकारविरहितौ भवेताम्, तदापि काव्यत्वं न व्याहन्यते। यथा-यः कौमारहरः स एव वरः -इत्यादि पद्ये

कोऽपि अलंकारः स्फुटतया न विभाव्यते परं सम्भोग-शृंगार-प्राधान्यात् सर्वथा रसनीयं हृद्यं चेदं काव्यम्। व्यवहार-दशा सर्वथा निर्दोषं ग्रहणीयं चेदं काव्यलक्षणम्। दोषान् यथाशक्यं पराकृत्य गुणान् तेषां रसस्य धर्मत्वात् रसं च परिगृह्य मम्मटः काव्यस्वरूपं निर्भ्रान्तं प्रतिपादितवान्, पूर्वाचार्यैश्च च स्वीकृतम् अलंकारप्राधान्यं तत्र अधरीकृतवान्।

साकल्यात् अपरिहार्यकाव्यतत्त्वसमावेशाच्च सर्वथा अभिनन्दनीयम् इदं लक्षणं साहित्यदर्पणप्रणेता विश्वनाथः कविराजं न विषेहे। तेन हि तथातिक्रूरम् आघूर्णितं प्रतिपदम् अस्य लक्षणस्य यथा सर्वदोषाणाम् आगारमिदं प्रतिभाति। लक्षणे गृहीतानि विशेषणानि तेन सविशेषम् उपहसितानि। 'अदोषौ' इति विशेषणम् अधिकृत्य स ब्रवीति-सर्वविधदोषरहितं काव्यं जगति सुदुर्लभम्। उत्तमोत्तमेऽपि काव्ये दूषणानि उद्‌भावयितुं शक्यन्ते सूक्ष्मदृग्भिः विद्वद्‌भिः। सर्वथा दोषविहीनौ चेत् शब्दार्थौ काव्यम् तर्हि काव्यं प्रविरलविषयं निर्विषयं वा स्यात्। कुत्रापि ईदृशं काव्यं न लभ्यते। नेदं मम्मटस्य अभिमतम्; ये च्युतसंस्कृतादयः दोषाः नित्यं रसम् अपघ्नन्ति ते नितान्तं वर्जनीयाः कविभिः। सर्वविधदोषाणां साकल्येण परिहारः सुदुष्करः। 'न्यक्कारो ह्ययमेव मे यदरयः' इति ध्वनिकाव्यं विधेयाविमर्शदोषेण कथमपि अकाव्यं न भवति।

'सगुणौ' इति विशेषणम् अन्तरेण विश्वनाथो भणति यत्- गुणाः रसस्य धर्मा भवन्ति न शब्दार्थयोः । 'ये रसस्यांगिनो धर्माः शौर्यादयः इवात्मनः' इति अभिधाय मम्मटोऽपि तेषां रसधर्मत्वं स्वीकरोति।[७] गुणाः प्रकामं रसस्य धर्माः परं गुणवृत्त्या ते शब्दार्थयोः धर्माः कथयितुं शक्यन्ते। 'गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता' इति।[८] अनयैव दृशा चात्र 'सगुणौ' इति पदं 'शब्दार्थौ' इति च अस्य विशेषणत्वेन अभ्युपेतम्।

'अनलंकृती पुनः क्वापि' इति काव्ये अलंकारप्राधान्यं न्यक्-करोति न अलंकाराभावम् ऊररीकरोति। 'सर्वत्र सालंकारौ क्वचित् स्फुटालंकारविरहेऽपि न काव्यत्वहानिः' इति सविवेकं वचनम् । 'यः कौमारहरः स एव हि वरः , इत्यादौ पद्येऽलंकारद्वयान्वेषणाय यः बुद्धि- प्रकर्षः विश्वनाथेन प्रदर्शितः, स अस्थाने, नात्र विमतिः। इत्थं तु पद्ये पद्येऽलंकाराणां शतं वा सहस्रं वोद्‌भावयितुं शक्यते। प्रयोजनान्तरप्रेरितं विश्वनाथस्य आलोचनम् ।[९]

पण्डितराजेन जगन्नाथेन 'शब्दार्थौ' इति विशेष्यपदम् आक्षेप-विषयीकृतम्। काव्यत्वं हि न शब्दार्थयोः समष्टौ वर्तते न च व्यष्टौ। शब्दे काव्यत्वं वसतीति तस्य अभिप्रायः। अनेनैव सः 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति काव्यलक्षणं प्रणीतवान्।

प्रायेण सर्वे काव्याचार्याः काव्यशरीरचिन्तायां व्यापृताः तस्य आत्मानं न सन्दधिरे। प्रथमतया वामनः 'रीतिरात्मा काव्यस्य' इत्यत्र काव्यात्मानुसन्धानं प्रति सप्रयत्नो दृश्यते। आनन्दवर्धनो हि ध्वनिं काव्यस्यात्मानं मेने- काव्यस्यात्मा ध्वनिः।[१०] सर्वथा विकलाः इमाः परिभाषाः। मम्मटाचार्यः प्रथमतया कृत्स्नतत्त्वावगाहिनी परिभाषां प्राणयत् इति शम्।

**संदर्भाः -**

---

१.काव्यालंकारः , १.१६
२.वक्रोक्तिजीवितम् , १.७ (वृत्तिः)
३.काव्यालंकारः ,१.१५

४. काव्यालंकारसूत्रवृत्तिः , १.१.१ (वृत्तिः)
५. काव्यमीमांसा , ६.६२
६. काव्यप्रकाशः ,सूत्रम् १
७. तत्रैव , ८.६६
८. तत्रैव , ८.७१
९. साहित्यदर्पणम् , प्रथमः परिच्छेदः
१०. ध्वन्यालोकः , १.१

-सह- आचार्या
राजकीय स्नातकोत्तर महाविद्यालयः
सैक्टर-४६ , चण्डीगढम्

# रसः

-डॉ. अजीत सिंहः

रसस्य विषयः गभीरः विस्तृतश्च। ब्रह्मवत् सर्वत्र व्याप्तः रसः सार्वकालिकः, सार्वभौमिकः सार्वदेशिकश्चास्ति। न हि जगति कश्चित् पदार्थः रसापृष्टः।

रसधारा चिरन्तनकालादेवाक्षुण्णा प्रवहन्ती अस्ति। रसविरोधिनोऽपि रसं प्रशंसयन् भावविह्वलाः भवन्ति। सः रसः विभावादिभिर्भावैः उत्पद्यते। आचार्य भरतः वदति -**यथाबीजाद्भवेद्वृक्षः वृक्षात्पुष्पं फलं तथा । तथा मूलं रसा सर्वे तेभ्यो भावाः प्रकीर्तिताः॥**

तस्य परमानन्दमयस्य रसस्य भेद-विषये विभिन्ना आचार्याः नैकमताः दृश्यन्ते। ''केचिदष्टौ रसानाहुरन्ये नव दशापरे'' अर्थात् कश्चिदाचार्यः अष्टौ रसाः, कश्चित् नवरसाः कश्चित् दशरसाः कश्चिच्च दशाधिकापि रसाः मन्यते। रससूत्र- प्रतिपादकग्रन्थे स्वनाट्यशास्त्रे आचार्यः रसस्य अष्टविधात्वं प्रतिपादितं -

**शृंगार हास्यकरुणरौद्रवीर भयानकाः।**
**वीभत्सादभुतसंज्ञौचेदष्टौनाट्येरसास्मृताः॥**

अत्र प्रश्नोऽयमुत्पद्यते यत् किं रसोऽपि मुख्यः गौणः वा भवति? रसस्तु रसः, सः कथं मुख्यः गौणः वा भवितुं शक्नोति ?

आचार्यैः वर्णितैः विभावादिभिः उत्पन्नाः रसाः स्वयमेवमौलिकाः अथवा कुत्रचिदस्ति तेषां स्रोतः? एतत् स्पष्टयन् मुनिः वदति- **( इह खलु मूल रसाः चत्वारः )** अनेन स्पष्टमस्ति यत् चत्वार एव रसाः मुख्याः, शेषे चत्वारः गौणाः।

के मुख्याः के चामुख्या इति स्पष्टयन् लिखति -

**शृंगाराद्धि भवेद्धास्यो, रौद्राच्च करुणो रसः ।**
**वीराच्चौवादद्भुतोत्पत्तिः, वीभत्सानु भयानकः ॥**

अर्थात्-शृंगारः. रौद्रः, वीरः, वीभत्सश्च चत्वारो मुख्याः रसाः। हास्यः, करुणः, अद्भुतः भयानकश्चत्वारो अमुख्याः रसाः भवन्ति। शृंगारात् हास्यरस उत्पद्यते, रौद्रात् करुणरस उत्पद्यते, वीरात् अद्भुत्-रस उत्पद्यते, वीभत्सात् भयानक रस उत्पद्यते। अतः स्पष्टमेव अष्टौ रसाः भवन्ति, तत्र चत्वारो मुख्याः चत्वारश्चामुख्याः ।

**-श्री महावीरसंस्कृतविद्यापीठम्, पश्चिमविहारः**
**नव देहली-६३**

## सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत-चन्द्रिका"

(आई.एस.एस.एन.-2347–1565)

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

## मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र

**सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका**

# "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में आन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित